# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर/दिसम्बर, २०१६

कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम् – ७** गुणाः - ७०

विषयः – वेदः **कोड – C.E.2.3.5** समयः – ३:०० तः ६:००

दिनाङ्कः – १-१२-२०१६ सन्दर्भग्रन्थः – याज्ञवल्क्यशिक्षा

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** ०८

(१) कोकिलः पञ्चमं ब्रूते निषादं तु वदेद् गजः
आश्वञ्चधैवतो ज्ञेयः स्वराः सप्तेति गीयते॥

(२) ऋचोऽर्धे तु द्विमात्रः स्यात्त्रिमात्रः स्यादृगन्तके।
रिक्तन्तु पाणिमुत्क्षिप्य द्वे मात्रे धारयेद् बुधः॥

(३) सुप्रसन्नमना भूत्वा किञ्चिन्नम्रस्त्वधोमुखः
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत॥

**प्रश्नः – २ शून्यहस्तं कुत्र कुत्र विधीयतेयथाशास्त्रं विवृणुत।** ०८

**अथवा**

**षडजादिस्वराणाम् उच्चारणप्रकारः प्रस्तूयताम्**

**प्रश्नः – ३ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) स्वराणां छन्दांसि (३)चतुर्दशदोषाः

(२) मात्राकालः (४) सप्तहस्तदोषाः

**प्रश्नः – ४ अधोलिखितेषु पञ्चप्रश्नाः समाधेयाः ।** ०५

(१) उदात्तस्य गोत्रः कः ?

(२) गावः किं रम्भन्ति ?

(३) कः वेदाध्ययनफलं न प्राप्नोति ?

(४) कः द्विमात्रा वदति ?

(५) कति स्वराः ?

(६) क्रमपाठेन किं प्राप्यते ?

(७) दन्तधावने के वृक्षाः ग्राह्याः ?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ अधोलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः व्याख्या विधेया।** ०८

(१) उदात्तादनुदात्ते तु वामया भ्रुव आरभेत्
उदात्तस्वरितोदात्ताः क्रमादक्षिणतो न्यसेत् ॥

(२) ककारान्ते टकारान्ते ङणे तर्जनिकां नमेत्।
पञ्चाङ्गुल्यं पकारे च तकारे कुण्डलाकृतिः॥

(३) इकारो यत्र दृश्यते इकारेणैव संयुतः
उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः ॥

**प्रश्नः – ६ चतुर्णां जात्यादीनां हस्तचालने कियदन्तरं प्रतिपादयत।** **०८**

**अथवा**

**कति विधाः स्वरभेदाः, के च ते, कानि च लक्षणानि ? यथाशास्त्रं प्रस्तूयताम्**

**प्रश्नः – ७ निम्नलिखितेषु टिप्पणीद्वयं लिखत ।** **०४**

(१) स्वरितस्य वैशिष्ट्यम् (३) अभिनिहितम्

(२) विसर्गस्य स्वरूपभेदाः (४) शिक्षाशास्त्रस्य प्रयोजनम्

**प्रश्नः – ८ अधोलिखितेषु पञ्चप्रश्नाः समाधेयाः ।** **०५**

(१) हस्तसन्निवेशं कथं कुर्यात्?

(२) 'चुलुकमुद्रा इत्युक्ते किम् ?

(३) स्वरितः कति विधाः ?

(४) तकारे कीदृशी आकृतिः ?

(५) कति विधा ऊष्मा भवन्ति ?

(६) शिक्षाशास्त्रं वेदपुरुषस्य केनाङ्गेन सह सम्बन्धं धारयति?

(७) निहितः कुत्र भवति ?

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ९ अधोलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः व्याख्या विधेया ।** **०८**

(१) भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते
वशिष्ठा उपसर्गाञ्च निपाताः काश्यपाः स्मृताः ॥

(२) हरिणी दर्शतमिति शतवल्शोति हारिता ।
व्वर्षो व्वर्षीयसीत्याहुस्तथा हंसपदेति च ॥

(३) वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः ।
द्विमात्रिके मात्रिकः स्यात् संयोगाद्यञ्च यो भवेत् ॥

**प्रश्नः – १० चवर्गपञ्चमाक्षरस्य ञकारस्योच्चारणविधिं वर्णयत।** **०८**

**अथवा**

**याज्ञवल्क्यशिक्षाशास्त्रस्य महत्वं प्रतिपादयत ।**

**प्रश्नः – ११ एकस्य टिप्पणीं लिखत ।** **०२**

(१) वर्णानां दैवतानि (२) स्वरभक्तय:

**प्रश्नः – १२ अधोनिर्दिष्टेषु द्वयोः लघूत्तरं यच्छ।** **०२**

१) सर्वेषामक्षराणां देवता का?

२) कति विधाः विवृत्तयः ?

३) कति रङ्गाः ?

४) ॐकारस्य कति मात्रा भवति ?

***